दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-182 | 1 | अप्रैल 24, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लाष्टमी
बैशाख 11 प्रविष्टांशः मङ्गलमयः भवेत्


2 सामाजिक- सुरक्षा- निवृत्तिवेतनस्य नियमेषु संशोधनम्, लाभान्वितानां सङ्ख्या वर्धित्वा ८.४२ लक्षं जाता

3 HPBOSE 12th RESULT 2026- उत्तरपुस्तिकानां मूल्याङ्कनकार्यं ८०% पूर्णम्, अस्मिन् दिने आगन्तुं शक्नोति परिणामः

4 राष्ट्रियपञ्चायतीराजदिवसः- सुदृढलोकतन्त्रस्य आधारस्तम्भः


## बदरीनाथमन्दिरस्य द्वाराणि वैदिक-मन्त्रोद्घोषैः पारम्परिक विधिभिः च सह भक्तानां कृते उद्घाटितानि।



उत्तराखण्डस्य चमोली-मण्डले स्थितस्य बदरीनाथ मन्दिरस्य द्वाराणि वैदिक-मन्त्रोद्घोषैः पारम्परिक विधिभिः च सह भक्तानां कृते उद्घाटितानि। अस्मदीय वार्ताहरस्य विवरणानुसारं, मुख्यमन्त्री पुष्करसिंहधामी प्रधानमन्त्रिणः नरेन्द्रमोदिनः नाम्ना 'महाभिषेक-पूजनम्' अकरोत्। असौ राष्ट्रस्य राज्यस्य च समृद्धये मंगलमयं प्रार्थनामकरोत्। मुख्यमन्त्रिणा तीर्थयात्रायाः व्यवस्थानां समीक्षा अपि कृता, सहैव प्रोक्तं यत् 'चतुर्धाम यात्रा' सुरक्षिता सुगमा च भवेत् इति सुनिश्चितं कर्तुं सर्वैरपि कार्य क्रियन्ते।

## तमिलनाडुराज्ये विधानसभा-निर्वाचनाय पश्चिमबंगाले च प्रथमचरणाय मतदानं सम्पन्नम्

तमिलनाडुराज्ये विधानसभानिर्वाचनाय पश्चिमबंगाले च प्रथमचरणाय मतदानं सम्पन्नम् । तमिलनाडुराज्ये मतदानं द्व्यशीति-प्रतिशन्मितं, पश्चिमबङ्गाले च द्विषष्टि-प्रतिशन्मितं यावत् संसूचितम्। तमिलनाडुराज्ये चतुस्त्रिंशदुत्तर-द्विशत-निर्वाचनासनेषु पश्चिमबंगालस्य द्वापञ्चाशदुत्तरैकशतं निर्वाचनासनेषु मतदानं प्रातः सप्तवादने आरब्धवान् । अवधेयव्यमस्ति यत् मतानां गणना मईमासस्य चतुर्थे दिनाङ्के भविष्यति ।

## उत्तराखण्डस्य टिहरी-मण्डले चम्बा-कोटि-नैल-पथि एकस्यां वाहन-दुर्घटनायां अष्ट जनाः मृताः

उत्तराखण्डस्य टिहरी-मण्डले चम्बा-कोटि-नैल-पथि एकस्यां वाहन-दुर्घटनायां अष्ट जनाः मृताः, त्रयः च व्रणिताः अभवन्। इयं दुर्घटना चम्बा-आरक्षक-स्थानस्य क्षेत्रे घटिता। आरक्षकाः 'एस.डी.आर.एफ.' इति दलं च त्वरितमेव घटनास्थलं सम्प्राप्य आपत् उद्धार कार्यम् आरब्धवन्तः। मुख्यमन्त्री पुष्करसिंहधामी दुर्घटनामभिलक्ष्य दुःखं प्रकटितवान् सहैव योग्यं उपचारं सुनिश्चेतुं परामृष्टवान्।

## देशे 'एल.पी.जी.' पर्याप्तमात्रायामस्ति यत्र बुधवासरे प्रायः द्वादश लक्षं यावत् अनिलकोषाः प्रेषिताः - सुजाता शर्मा

प्रशासनेन प्रोदीरितं यत् पश्चिम-एशिया-खण्डे सङ्कटावधौ नागरिकाणां कृते असुविधा न भवेत् इति सुनिश्चेतुम् आवश्यकाः पदक्षेपाः विधीयन्ते। प्रशासनेन दृढतया प्रतिपादितं यत् अत्यावश्यकानां सामग्रीणां कृते भारतीयनागरिकाः प्रभाविताः न सन्ति। अन्तर्मन्त्रालय-विवरण-सभायां पेट्रोलियम-सचिवा सुजाता शर्मा सूचितवती यत् देशे 'एल.पी.जी.' पर्याप्तमात्रायामस्ति यत्र बुधवासरे प्रायः द्वादश लक्षं यावत् अनिलकोषाः प्रेषिताः । सा अवोचत् यत् प्रायः चतुः नवतिः प्रतिशतं आपूर्तिः 'डिलीवरी ऑथेंटिकेशन कोड' डी ए सी इति माध्यमेन पूर्णा भवति, तावत् वाणिज्यिक एल.पी.जी. आपूर्तिः सप्ततिः प्रतिशतं वर्तते।

## सेंट्रल-बोर्ड-ऑफ़-सेकेंडरी-एजुकेशन (CBSE) इत्यनेन मईमासस्य पञ्चदशदिनाङ्के दशमकक्षायाः द्वितीयचरणस्य परीक्षा आयोक्ष्यते



CBSE -द्वितीयचरणपरीक्षा

सेंट्रल-बोर्ड-ऑफ़-सेकेंडरी-एजुकेशन (CBSE) इत्यनेन संस्थानेन मईमासस्य पञ्चदशदिनाङ्के दशमकक्षायाः द्वितीयचरणस्य परीक्षा आयोक्ष्यते। एषा परीक्षा वैकल्पिकी वर्तते। उत्तीर्णाः छात्राः विज्ञान-गणित-सामाजिक-विज्ञान-भाषाणां केषुचित् त्रिषु विषयेष्वेव स्वकीयं प्रदर्शनम् संशोधयितुं अनुमताः भविष्यन्ति। संस्थानेन अस्य मासस्य पञ्चदशदिनाङ्के दशमकक्षायै प्रथम-मुख्यपरीक्षायाः परिणामा समुद्घोषिताः। एषः पदक्षेपः राष्ट्रिय-शिक्षा-नीति विंशति-विंशति इत्यस्यानुरूपं वर्तते, यस्मिन् शैक्षणिकसत्रे एव छात्रेभ्यः द्वितीयावसरं प्रदाय परीक्षया सम्पृक्तम् अवसादं दूरीकर्तुं कृतप्रयासः समर्थ्यते।

## विदेशीय-पोतेषु आक्रमण-घटनासु किमपि भारतीयं जलयानं लक्ष्यं न कृतम्, सर्वे भारतीयाः समुद्रीय उद्यमिनः च सुरक्षिताः सन्ति - नौवहन-मन्त्रालयः



नौवहन-मन्त्रालयस्य अधिकारी मुकेश-मङ्गलः अवदत् यत् विदेशीय-पोतेषु आक्रमण-घटनासु किमपि भारतीयं जलयानं लक्ष्यं न कृतम्, सर्वे भारतीयाः समुद्रीय उद्यमिनः च सुरक्षिताः सन्ति। विदेश-मन्त्रालयस्य अधिकारी असीम आर. महाजनः उक्तवान् यत् प्रशासनं सूक्ष्म-निरीक्षणं कुर्वत् अस्ति, नियन्त्रण-कक्षाः सक्रियाः सन्ति सहैव दूतावासाः साहाय्यार्थं समन्वयम् कुर्वन्तः सन्ति। सः सूचितवान् यत् फरवरी मासस्य अष्टाविंशतिः दिनाङ्कतात् अधुना यावत् द्वादश लक्षतः अधिकाः यात्रिणः अस्मात् क्षेत्रात् भारतं प्रत्यागताः।

## यदा विश्वं कठिनं भू-राजनैतिक-समाह्वानं सम्मुखीकरोति, तदा भारत-अफ्रीका-सन्धिः विशेषं महत्त्वम् आवहति - विदेशमन्त्री ।



विदेशमन्त्री डॉ. एस. जयशङ्करः अवोचत् यत् यदा विश्वं कठिनं भू-राजनैतिक-समाह्वानं सम्मुखीकरोति, तदा भारत-अफ्रीका-सन्धिः विशेषं महत्त्वम् आवहति। सः न्यगादीत् यत् अद्य भारतस्य विदेशनीतौ अफ्रीका महाद्वीपः केन्द्रस्थानं भजते सहैव भारतेन गतवर्षेषु अफ्रीका-खण्डे स्वस्य कूटनीतिक प्रभावो विस्तारितः। विदेशमन्त्री नवदेहल्यां 'भारत-अफ्रीका-मञ्च-शिखरसम्मेलनस्य' पूर्वावलोकन कार्यक्रमे अस्य 'लोगो' इति चिह्नस्य, विषयस्य अथ च जालपुटस्यानावरणं कुर्वन् एतत् प्रतिपादितवान्। शिखरसम्मेलनमिदम् आगामि-मासस्य अष्टाविंशतिः दिनाङ्कात् एकत्रिंशत् दिनाङ्कपर्यन्तं आयोक्ष्यते।

## सुभाषितम्

**असद्भिः शपथेनोक्तं,**
**जले लिखितमक्षरम्।**
**सद्भिस्तु लीलया प्रोक्तं,**
**शिलालिखितमक्षरम्।।**

भावार्थः- असभ्य, दुष्ट स्वभाव के व्यक्तियों द्वारा किसी कार्य को करने के लिए ली गई शपथ जल में लिखे अक्षरों के समान अस्थायी होती है, अर्थात् वे उसका अनुपालन नहीं करते है। इस के विपरीत सभ्य, सज्जन और सत्यवादी व्यक्तियों के द्वारा हंसी मजाक में भी कही हुई कोई बात एक शिलालेख के समान स्थायी होती है, अर्थात् वे जो कहते हैं, उसे अवश्य पूरा कर के दिखाते हैं।


दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## शेयरसूचकाङ्के अपकर्षः

देशस्य प्रमुखेषु शेयर-सूचकाङ्केषु प्रायः एकप्रतिशतपरिमितः ह्रासः (गिरावट) अभवत्। सेन्सेक्स्-सूचकाङ्कः ८५२ अङ्कैः पतित्वा ७७,६६४ अङ्केषु निरुद्धः (बंद हुआ), तथैव निफ्टी-सूचकाङ्कः अपि २०५ अङ्कैः पतित्वा २४,१७३ अङ्कपर्यन्तम् आगतः। विस्तृत-शेयर-विपण्यां (Broad Market), मिड-कैप-१०० इत्यस्मिन् ०.४ प्रतिशतं तथा स्मॉल-कैप-१०० इत्यस्मिन् प्रायः ०.७ प्रतिशतपरिमितः ह्रासः अङ्कितः।

# सामाजिक- सुरक्षा- निवृत्तिवेतनस्य नियमेषु संशोधनम्, लाभान्वितानां सङ्ख्या वर्धित्वा ८.४२ लक्षं जाता



**हिमसंस्कृतवार्ताः- शिमला।** वर्तमान-राज्यसर्वकारेण गतेषु त्रिवर्षेषु सामाजिक- सुरक्षा- निवृत्तिवेतनस्य ९९,७९९ नूतनप्रकरणानि स्वीकृतानि, येन राज्ये हितधारिणां सङ्ख्या वर्धित्वा ८,४१,९१७ संजाता। एतेषु लाभान्वितेषु वरिष्ठनागरिकाः, विधवाः, एकलनार्यः, दिव्यांगजनाश्च विविधवर्गाणाम् अन्तर्गतं सम्मिलिताः सन्ति। कुल-लाभान्वितेषु १,०४,७४० जनाः इन्दिरागान्धी- राष्ट्रिय- वृद्धावस्था- पेंशन, ५,०४,२५३ राज्य- वृद्धावस्था- पेंशन, २५,४१४ इन्दिरा- गान्धी- राष्ट्रिय- विधवा- पेंशन, १,२६,८०८ विधवा- निराश्रित- एकलनारी- पेंशन, १,३४० इन्दिरागान्धी- राष्ट्रिय- विकलाङ्गता- पेंशन, ७८,२९१ जनाः विकलाङ्गता- राहत- भत्तां प्राप्नुवन्तः सन्ति। मुख्यमन्त्री सुखविन्दरसिंह सुक्खुमहोदयः अवदत् यत् वित्तवर्षे २०२३-२४ मध्ये सामाजिक-सुरक्षा-निवृत्तिवेतनस्य ४१,७९९ नूतनप्रकरणानि स्वीकृतानि। २०२४-२५ वर्षे ४१,०१२, २०२५-२६ वर्षे च १६,९८८ नूतनप्रकरणानि अनुमतानि। तेन उक्तं यत् राज्यसर्वकारेण सम्प्रति एव सामाजिक- सुरक्षा- निवृत्तिवेतनस्य नियमेषु संशोधनं स्वीकृतम्, येन निवृत्तिवेतनस्य समये वितरणं सुनिश्चितं भवेत्। समाजस्य दुर्बलवर्गाणां कल्याणायापि सर्वकारः कटिबद्धः अस्ति, यस्य फलस्वरूपं ६९ वर्षपर्यन्ताः २,६७,०४० महिलाः योजनायाः अन्तर्गतं प्रतिमासं १,५०० रूप्यकाणां निवृत्तिवेतनं लभन्ते। राज्ये सम्प्रति ५,०४,२५३ वृद्धावस्था-पेंशनधारकाः, १,२६,८०८ विधवा- निराश्रित- एकलनारी- हितधारिण्यः, ७८,२९१ विकलाङ्गता- आश्रय- वृत्ति- प्राप्तारः, १,०२१ कुष्ठरोग- पुनर्वास- भत्ता- धारिणः, ५० 'ट्रान्सजेण्डर' च पेंशनधारकाः सन्ति।

मुख्यमन्त्रिणा सुक्खुमहोदयेन कथितं यत् राज्यसर्वकारेण १०० प्रतिशतं दिव्यांगतायुक्तेभ्यः व्यक्तिभ्यः सामाजिक-सुरक्षा-निवृत्तिवेतनं १,७०० रूप्यकतः वर्धयित्वा ३,००० रूप्यकाणि प्रतिमासं कर्तुं निर्णयः स्वीकृतः, येन प्रायः ७,००० जनाः लाभान्विताः भविष्यन्ति। सः अवदत् यत् विधवा- परित्यक्त- एकलनारीणां तथा ४० तः ६९ प्रतिशतं दिव्यांगतायुक्तानां व्यक्तीनां कृते निवृत्तिवेतनप्राप्तये 'आयसीमा', 'ग्रामसभा-स्वीकृतिः' इत्येतयोः अनिवार्यतायाः समाप्तिः सर्वकारेण कृतः महत्त्वपूर्णः परिष्कारः अस्ति। विशेषतः महिलाः दिव्यांगजनाश्च प्रशासनिकप्रक्रियासु प्रायः काठिन्यं अनुभवन्ति स्म। औपचारिकप्रक्रियायाः सरलीकरणेन तेषां कृते निवृत्तिवेतनस्य सुलभता जाता। मुख्यमन्त्री अवदत्, "'सुशासनाय' उत्तमः सर्वकारः आवश्यकः। वर्तमानसर्वकारः एतत् सुनिश्चितं करोति यत् समाजस्य अत्यन्तं निर्बलवर्गाः राज्यस्य संसाधनेषु स्वकीयं अधिकारपूर्णं न्याय्यं भागं प्राप्नुवन्तु।" तेन उक्तं यत् भ्रष्टाचारस्य मार्गाः रुद्धाः कृताः सन्ति तथा च अतिरिक्तं राजस्वं अर्जितं, यत् अधुना आवश्यकतायुक्तानां जनानां कल्याणकारीयोजनासु व्ययीक्रियते।

# एषः जनाक्रोशः न केवलम् एका सभा, अपि तु राजनैतिकपरिवर्तनस्य आधारशिला अस्ति- जयरामठाकुरः



**हिमसंस्कृतवार्ताः- शिमला।** भाजपा-महिला-मोर्चा द्वारा शिमला-नगरस्य 'चौड़ा मैदान' इत्यत्र आयोजितायां 'जन- आक्रोश- महिला- पदयात्रायां' विपक्षनेता जयरामठाकुरः अवदत् यत् एषः जनाक्रोशः केवलम् एका सभा नास्ति, अपि तु आगामि-राजनैतिकपरिवर्तनस्य आधारशिला अस्ति। तेन उक्तं यत् काङ्ग्रेसपक्षस्य महिलाविरोधी स्वरूपं पूर्णतया प्रकटितं जातमस्ति, प्रदेशस्य महिलाः च अस्य उत्तरं लोकतान्त्रिक- विधिना दास्यन्ति।

तेन कथितं यत् नारीशक्तिः अधुना निर्णायिकां भूमिकां निर्वोढुं सज्जा अस्ति, एतद् आन्दोलनम् च प्रदेशस्य राजनीतेः दिशां परिवर्तयिष्यति। सभायां उपस्थिताः महिलाः, युनः, कार्यकर्ताराश्च एकीभूय महिलाधिकाराणां समर्थने स्वरं प्रबलं कृतवत्यः। अन्ते भाजपानेतारः अवदन् यत् एतद् आन्दोलनम् आगामिसमये अधिकं व्यापकं भविष्यति, महिलानां सम्मान- समानता- राजनैतिकसहभागिताभ्यः एषः सङ्घर्षः निरन्तरं प्रचलति। सशक्ता नारी एव सशक्तसमाजस्य सशक्तराष्ट्रस्य च आधारः अस्ति, एषः सङ्कल्पः अधुना जनान्दोलनं जातमस्ति।

**७० कोटि-भगिनीभिः सह विश्वासघातः**

भाजपा- प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः स्वसम्बोधने अवदत् यत् काङ्ग्रेसदलेन 'नारीशक्ति वन्दन अधिनियम्' इत्यस्य विरोधं कृत्वा देशस्य ७० कोटि-भगिनीभिः सह विश्वासघातः कृतः। तेन उक्तं यत् गते एकस्मिन् दशके प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे महिलाः आर्थिक- सामाजिक- शैक्षणिकरूपेण सशक्ताः कृताः। अधुना ताभ्यः सत्तायां सहभागितायाः प्रदानस्य समयः आगतः आसीत्, किन्तु काङ्ग्रेसपक्षेण तासां मार्गे बाधा उत्पादिता। सः राज्यसर्वकारं लक्ष्यीकृत्य अवदत् यत् २८ लक्षमहिलाभ्यः प्रतिमासं १५०० रूप्यकाणां दानस्य प्रतिज्ञा कृता आसीत्, किन्तु अद्यावधि एकस्यापि महिलायै अस्य लाभः न प्राप्तः। एतत् केवलं वचनं नास्ति, अपि तु महिलाभिः सह स्पष्टं छलम् अस्ति।

# फ्रांसदेशस्य यात्रां कुर्वद्भ्यः भारतीयनागरिकेभ्यः अधुना आव्रजनपत्रकस्य आवश्यकता न वर्तते



भारतेन फ्रांसस्य सः निर्णयः प्रशंसितः यस्मिन् भारतीय-नागरिकेभ्यः आव्रजनानुमतिपत्र-मुक्त-यात्रायाः सुविधा समारब्धा। एषः निर्णयः फ़रवरी-मासे मुम्बय्यां विहितस्य मेलनस्य अवधौ प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्रपतिना इमैनुएल मैक्रॉन इत्यनेन मध्ये जातायाः परस्परसन्ध्याः अनन्तरं स्वीकृतः अस्ति। विदेशमन्त्रालयः अकथयत् यत् अप्रैलमासस्य दशदिनाङ्कात् फ्रांसदेशस्य यात्रां कुर्वद्भ्यः भारतीयनागरिकेभ्यः अधुना आव्रजनपत्रकस्य आवश्यकता न वर्तते। मन्त्रालयेन एषः पदक्षेपः भारत-फ्रांसयोः मध्ये सुदृढ रणनीति-सहयोगत्वेन प्रतिपादितः अस्ति सहैव अनेन द्वयोर्देशयोर्मध्ये सुगमयात्रया सह पारस्परिकसम्बन्धाः अपि सुदृढाः भविष्यन्ति।

# रेलमार्गाणां नवीनीकरणेन, उन्नतपरीक्षणेन, उन्नतप्रबन्धनेन च यात्रा-गुणवत्ता उत्तमा जाता - प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी अकथयत् यत् रेलमार्गाणाम् आधुनिकीकरणेन एकः तीव्रः विश्वासात्मकः च रेलमार्गसम्पर्कः द्रुतगत्या अग्रे वर्धते। एकस्मिन् सञ्जालीयसंदेशे एकस्मिन् आङ्ग्लदैनिकपत्रे रेलमंत्रिणा अश्विनीवैष्णवेन लिखितम् एकं लेखं पुनः प्रकाशयन्, श्रीमोदी प्रोक्तवान् यत् रेलमार्गाणां नवीनीकरणेन, उन्नतपरीक्षणेन, उन्नतप्रबन्धनेन च यात्रा-गुणवत्ता उत्तमा जाता अपि च रेलयानानाम् उच्चगतिरपि सुनिश्चिता । तेन पुनः कथितं यत् एतैः परिवर्तनैः यात्रासमयः न्यूनः कृतः अस्ति सहैव यात्रा सुगमा सरला च सञ्जाता।

## जीवाश्मतैल-प्राकृतिक-वात्येधन-मंत्रालयः तासां सूचनानां खंडनम् अकरोत् यासु जीवाश्मतैलस्य मूल्ये सम्भावितवृद्ध्याः परामर्शः प्रदत्तः आसीत्

जीवाश्मतैल-प्राकृतिक-वात्येधन-मंत्रालयः तासां सूचनानां खंडनम् अकरोत् यासु जीवाश्मतैलस्य मूल्ये सम्भावितवृद्ध्याः परामर्शः प्रदत्तः आसीत्। मंत्रालयः स्पष्टीकृतवान् यत् सर्वकारस्य पार्श्वे एतादृशः कः अपि प्रस्तावः न अस्ति। मन्त्रालयः प्रोक्तवान् यत् एतादृशानां सूचनानाम् उद्देश्यं नागरिकेषु भयोत्पादनम् अस्ति सहैव मन्त्रालयेन एताः सूचनाः भ्रामकपूर्णाः प्रोक्ताः। मन्त्रालयः सबलम् अकथयत् यत् भारतम् एव सः देशः अस्ति यत्र विगतेषु चतुर्ष वर्षेषु जीवाश्म-शिलातैलयोः मूल्यानि न वर्धितानि। मन्त्रालयेन प्रोक्तं यत् केन्द्रसर्वकारः तैलवितरकानि संस्थानानि च अन्तराष्ट्रियतैलमूल्येषु भीषणवृद्ध्यानन्तरम् अपि नागरिकेभ्यः सौकर्यं प्रदातुं निरन्तरं पदक्षेपान् समुत्थापयन्।

# उपनेत्र-काचस्य स्वच्छीकरणाय निर्मितं काष्ठपेटिका- प्रतिरूपम्; धनेटा- विद्यालयस्य छात्रा वर्षा राज्यस्तरीयायै प्रतियोगितायै चयनिता



हिमसंस्कृतवार्ताः- हमीरपुरम्।यदा काष्ठपेटिका उद्घाट्यते, तदा अन्तर्निहितः स्पञ्जः उपनेत्रस्य लेंसान् स्वयमेव मार्जयति। एकवारं स्वच्छीकृते सति पुनः पुनः स्वच्छीकरणस्य आवश्यकता न भवति, अतः समयस्य अपि संरक्षणं भवति।

हमीरपुरस्य राजकीय- वरिष्ठ- माध्यमिक- पाठशाला धनेटा इत्यस्य द्वादशकक्षायाः छात्रया वर्षा नाम्ना एषः आदर्शः निर्मितः। विशेषतया एषः पर्यावरणानुकूलः अस्ति, यतः अस्मिन् उपनेत्रे स्थापयितुं प्लास्टिकनिर्मितस्य पेटिकायाः स्थानं न दत्तम्, अपि तु काष्ठनिर्मिता पेटिका उपयुज्यते।

काष्ठनिर्मिते पेटिकायां उपनेत्रं प्लास्टिकपेटिकायाः अपेक्षया अधिकं सुरक्षितं भवति। वर्षया उपनेत्रस्य आकारानुसारं काष्ठपेटिका निर्मिता। पेटिकायाः अन्तः यत्र उपनेत्रस्य लेंसाः स्थाप्यन्ते, तत्र स्पञ्जः सुस्थिरतया संयोजितः। स्पञ्जे अल्पमात्रया जलं लेंस- शोधनद्रव्यम् (क्लीनर) च सिञ्चितम्, येन उपनेत्रस्य लेंसाः स्वयमेव स्वच्छाः अभवन्।

वर्षया एषः आदर्शः शैक्षणिकसत्रे २०२४–२०२५ मध्ये, यदा सा दशमकक्षायां आसीत्, तदा निर्मितः। अनन्तरं २१ अप्रैल दिने हमीरपुर नगरे आयोजितायां जिलास्तरीयस्पर्धायां, यत्र ८८ विद्यालयेभ्यः चयनिताः छात्राः सहभागिनः आसन्, उत्कृष्टप्रदर्शनस्य आधारेण सप्त छात्राः राज्यस्तरीयस्पर्धायै चयनिताः, तेषु वर्षा अपि समाविष्टा अस्ति। अस्मिन् अवसरे वर्षायाः मार्गदर्शिका विज्ञानाध्यापिका मोनिका अपि उपस्थिता आसीत्, या छात्रायाः मार्गदर्शनं कृतवती। विद्यालये बुधवासरे प्रार्थनासभायां प्रधानाचार्यः राजकुमारसिंहः वर्षां सम्मानितवान्।

# HPBOSE 12th RESULT 2026- उत्तरपुस्तिकानां मूल्याङ्कनकार्यं ८०% पूर्णम्, अस्मिन् दिने आगन्तुं शक्नोति परिणामः

हिमसंस्कृतवार्ताः- धर्मशाला। हिमाचलप्रदेश- विद्यालय- शिक्षा- मण्डलस्य द्वादश्याः कक्षायाः वार्षिकपरीक्षाणाम् उत्तरपुस्तिकानां मूल्याङ्कनस्य प्रायः ८० तः ८५ प्रतिशतं कार्यं सम्पन्नम् अभवत्। शिक्षा-मण्डलेन २२ अप्रैल पर्यन्तं मूल्याङ्कनकार्यं पूरयितुं समयसारिणी प्रसारिता आसीत्, किन्तु अधिक- अवकाशानां कारणात् एतत् कार्यं निर्धारितसमये पूर्णं भवितुं न शक्तम्।

शिक्षा-मण्डलेन सम्पूर्णे प्रदेशे ४१ विविधानि मूल्याङ्कनकेन्द्राणि निर्मिताणि आसन्, यत्र ५ सहस्राधिकाः शिक्षकाः उत्तरपुस्तिकाणां परीक्षणं कुर्वन्तः सन्ति। सूत्राणाम् अनुसारं मूल्याङ्कनकार्याय तानि एव केन्द्राणि अवशिष्टाणि सन्ति, यत्र मूल्याङ्कनार्थं अधिकाः उत्तरपुस्तिकाः प्रेषिताः आसन्।

मण्डलस्य सचिवः डॉ. मेजर विशाल शर्मा कथयति यत् मूल्याङ्कनकार्यम् अन्तिमचरणे वर्तते। शिक्षा- मण्डलस्य प्रयासः अस्ति यत् ३० अप्रैल पर्यन्तं द्वादश्याः कक्षायाः परीक्षापरिणामः घोषितः भवेत्, यदर्थं मण्डलस्य कर्मचारिणः मूल्याङ्कनकार्यरताः शिक्षकाश्च पूर्णोत्साहेन सल्लग्नाः सन्ति।

# टैक्सी-ट्रक-चालकानां प्रतिनिधिमण्डलेन मुख्यमन्त्रिणा सुक्खु-महोदयेन सह कृता वार्ता, एषा अभ्यर्थना प्रस्थापिता



हिमसंस्कृतवार्ताः -काङ्गड़ा।

मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खु-महोदयेन सह गुरुवासरे काङ्गड़ा-जनपदस्य विविधानां 'टैक्सी' तथा 'ट्रक' चालक-सङ्घानां (Unions) एकेन प्रतिनिधिमण्डलेन स्वकीयान् विविधान् विषयान् अधिकृत्य काङ्गड़ा-विमानपत्तने (Airport) वार्ता कृता। मुख्यमन्त्री सङ्घस्य पदाधिकारिणां समस्याः ध्यानपूर्वकं श्रुतवान् तथा च तेषां अभ्यर्थना-विषये सहानुभूतिपूर्वकं विचारं कर्तुं आश्वासनं दत्तवान्। प्रतिनिधिमण्डलेन काङ्गड़ा-जनपदे आर.टी.ओ. (RTO) तथा एम.वी.आई. (MVI) इत्येतयोः माध्यमेन अपि सम्प्रति वाणिज्यिक-वाहनानां (Commercial Vehicles) कृते 'मैनुअल-फिटनेस्-परीक्षणस्य' सुविधां उपलब्धं कर्तुं आग्रहः कृतः। मुख्यमंत्री तदर्थं यथासंभवं समाधानं कर्तुम् आश्वसितवान्।




# "वेदविज्ञानसंकायेन आदिशङ्कराचार्यजयन्त्युत्सवः महता वैभवेन परिपालितः"

हिमसंस्कृतवार्ता- डॉ आलोकः। महर्षिमहेशयोगीवैदिक-विश्वविद्यालये, मध्यप्रदेशे, वेद विभागे

वैशाखशुक्लपञ्चम्यां तिथौ दिनाङ्के 21 अप्रिल 2026 मङ्गलवासरे “आदिशङ्कराचार्यजयन्त्युत्सवोपलक्ष्ये वेदविज्ञान-सङ्कायेन एकदिवसीयव्याख्यानसंगोष्ठी समायोजिता, यस्योद्देश्यः आदिशङ्कराचार्यस्य जीवनवृत्तान्तम्, तस्य दर्शनम्, अद्वैतवेदान्तस्य सिद्धान्तानां च प्रचारः आसीत्।

अत्र ज्ञातव्यम् यत् विश्वविद्यालयस्य संस्थापकः वैज्ञानिकसंतशिरोमणिः महर्षिमहेशयोगीवर्यः शाङ्करी-परम्परायाः उत्तराम्नायज्योतिष्पीठोद्धारकः शङ्कराचार्य-स्वामिनः श्रीब्रह्मानन्दसरस्वतीमहाराजस्य कृपापात्र-शिष्योस्ति। कार्यक्रमोयं विश्वविद्यालयस्य आदरणीयकुलगुरुः प्रो.नरेशकुमारतिवारीवर्यस्य संरक्षणेन तथा माननीयकुलसचिवः श्री संदीपशर्मामहोदयस्य मार्गदर्शनेन च सुसम्पन्नः। विश्वविद्यालयस्य असौ कार्यक्रमो वैदिकगुरुपूजनपरम्परया वैदिकमङ्गलाचरणेन च समारब्धः। कार्यक्रमसंयोजकः वेद विभागाध्यक्षः डॉ. आलोकचन्द्रपरिडामहोदयः प्रास्ताविकं पठित्वा “गुरुशिष्यपरम्परा” इति विषये चिन्तनं प्रदर्श्य, भारतीयज्ञानपरम्परायां गुरोः महत्त्वं रेखाङ्कितवान्।तदनु मुख्यवक्ता श्रीगिरीजाशङ्करचौधरीमहोदयः (ध्यानसिद्धिशिक्षकः) “आदिशङ्कराचार्यस्य जीवनवृत्तान्तम्” इति विषये उद्बोधयन् तस्य जीवनं, कृतित्वं, तथा भारतीयदर्शनं प्रति अमूल्ययोगदानं च प्राकाशयत्।कार्यक्रमस्य अध्यक्षः प्रो.मानवेन्द्रपाण्डेयः (आचार्यः,ज्योतिषविभागाध्यक्षः) कृतवान्। महोदयः “शङ्कर-दिग्विजयम्” इति विषयं प्रबोधयन् शङ्कराचार्यस्य दार्शनिकविजययात्रां सांस्कृतिकप्रभावं च विस्तरेण प्रतिपादितवान्। तदनु कार्यक्रमे डॉ. खुशेन्द्रदेवचतुर्वेदीमहोदयः कृतज्ञताज्ञापनं कृतवान्, तथा श्रीधनी-रामत्रिपाठीमहोदयः शान्तिपाठं कृतवान्। एतस्मिन् अवसरे डॉ. राघवेन्द्रसिंहकलचुरीवर्यः, डॉ.नवीनकुमारचौबेमहोदयः, डॉ.हसमुखलालवर्यः, श्रीमतीरञ्जितापरौहामहोदया च विशेषरूपेण उपस्थिताः। कार्यक्रमे समन्वयकः डॉ.नित्येश्वरचतुर्वेदीमहोदयः , सह-समन्वयकः डॉ.खुशेन्द्रदेवचतुर्वेदीवर्यः, संयोजकः डॉ. आलोकचन्द्रपरिडावर्यः, तथा सहसंयोजकाः—श्रीहरि-नारायणशर्मा, श्रीसत्यनारायणशुक्लः, श्रीधनीराम-त्रिपाठीवर्यः, श्रीमनीषपाण्डेयवर्याश्च विशेषयोगदानं दत्तवन्तः। कार्यक्रमे पञ्चाशत्(50)अधिकाः जना उपस्थिताः आसन्। समुपस्थिताः आदिशङ्कराचार्यस्य जन्मवृत्तान्तात् आरभ्य जीवनदर्शनपर्यन्तम् , शङ्करतः आदिशंकरपर्यन्तं यात्रारूपीज्ञानञ्च आप्नुवन्। कार्यक्रमोऽसौ अतीव सफलः ज्ञानवर्धकश्च अभवत्। योगविभागाध्यक्षः डॉ.नित्येश्वरचतुर्वेदीमहोदयः कार्यक्रमस्य सञ्चालनं कृतवान्







# राष्ट्रियपञ्चायतीराजदिवसः- सुदृढलोकतन्त्रस्य आधारस्तम्भः

**१. प्रस्तावना: ग्रामस्वराज्यस्य अवधारणा**
भारतीयसंस्कृतौ "पञ्चपरमेश्वरः" इति अवधारणा पुरातनकालादेव प्रचलिता अस्ति। अस्माकं शास्त्रेषु "सभा" च "समितिः" च प्रजापतेः दुहितरौ इति उक्तम्। आधुनिककाले महात्मा गान्धिमहोदयस्य 'ग्रामस्वराज्यम्' इति स्वप्नं साकारं कर्तुं पञ्चायतीराजव्यवस्था अतीव महत्त्वपूर्णा अस्ति। २४ एप्रिल दिनाङ्कः न केवलं तिथिविशेषः, अपितु भारतीयलोकतन्त्रस्य विकेन्द्रीकरणस्य महापर्व अस्ति।

**२. ७३तमः संविधानसंशोधन-अधिनियमः (ऐतिहासिकं महत्त्वम्)**
यद्यपि भारतस्य स्वतन्त्रतापश्चात् १९५९ तमे वर्षे राजस्थानस्य नागौरमण्डले पञ्चायतीराजस्य आरम्भः जातः, तथापि तस्याः व्यवस्थायाः कृते किमपि निश्चितं संवैधानिकं बलं नासीत्। १९९३ तमे वर्षे एप्रिल-मासस्य २४ दिनाङ्के ७३तमः संविधानसंशोधन-अधिनियमः प्रभावशाली अभवत्। अनेन संविधाने 'नवांशः' (Part IX) तथा 'एकादश अनुसूची' (11th Schedule) योजिता, यस्मिन् पञ्चायतानां २९ विषयाणां उल्लेखः अस्ति।

**३. पञ्चायतीराजस्य त्रिस्तरीया संरचना (विस्तृत-विवरणम्)**
शासनव्यवस्थां सुचारुरूपेण चालयितुं इयं व्यवस्था त्रिषु स्तरेषु विभक्ता अस्ति:४.

| स्तरः | संस्था | कार्यक्षेत्रम् |
|---|---|---|
| निम्नस्तरः | ग्रामपञ्चायत् | ग्रामस्य स्थानीयविकासः, जल-प्रकाश-स्वच्छता व्यवस्था। |
| मध्यमस्तरः | पञ्चायतसमितिः | खण्डस्तरे ग्रामपञ्चायतानां कार्याणां समन्वयः। |
| उच्चस्तरः | जिलापरिषद् | पूर्णजनपदस्य कृते योजनानिर्माणं तथा मार्गदर्शनम्। |

## सामाजिक-सशक्तीकरणे पञ्चायतानां भूमिका

**•महिलाप्रतिनिधित्वम्:** संविधानेन पञ्चायतेषु महिलाभ्यः ३३% (अनेकेषु राज्येषु यथा •हिमाचलप्रदेशे ५०%) आरक्षणं प्रदत्तम्। अनेन ग्रामीणक्षेत्रेषु महिलानां नेतृत्वक्षमतायां वृद्धिः जाता।
**वञ्चितवर्गाणां उत्थानम्:** अनुसूचितजाति-जनजाति वर्गाणाम् कृते जनसङ्ख्यानुसारं आरक्षणस्य व्यवस्था कृता, येन समाजे समानतायाः भावः जागृतः अभवत्।
**•ग्रामसभा:** इयं पञ्चायतीराजस्य मूलभूता इकाई अस्ति। अत्र सर्वे ग्रामिणाः प्रत्यक्षतया निर्णयप्रक्रियायां भागं गृह्णन्ति, यत् प्रत्यक्षलोकतन्त्रस्य (Direct Democracy) उदाहरणम् अस्ति

**•५. वर्तमानचुनौत्यः समाधानं च**
अद्यतनकाले पञ्चायतीराजव्यवस्थायां काश्चन समस्याः अपि दृश्यन्ते, यथा— वित्तीयसंसाधनानां न्यूनता, अशिक्षा, तथा प्रशासनिकहस्तक्षेपः। एतेषां समाधानाय सर्वकारेण **'ई-ग्रामस्वराज'** पोर्टल (e-GramSwaraj) आरब्धम्, येन पञ्चायतानां कार्येषु पारदर्शिता आगता अस्ति।

**६. उपसंहारः**
राष्ट्रियपञ्चायतीराजदिवसः अस्मान् स्मरयति यत् राष्ट्रस्य प्रगतिः ग्रामस्य प्रगतौ निहिता अस्ति। यदा ग्रामेषु शिक्षा, स्वास्थ्यं, स्वरोजगारश्च सुलभाः भविष्यन्ति, तदैव 'रामराज्यस्य' संकल्पः पूर्णः भविष्यति। अतः अस्माभिः स्वरूपात्मकं विकासं हित्वा गुणात्मकविकासे बलं दातव्यम्।



## निर्वाचन-वृत्तान्तः -: पश्चिमबङ्गाल-तमिळनाडुराज्ययोः ऐतिहासिकं मतदानम्

निर्वाचन-आयोगेन घोषितं यत् पश्चिमबङ्गालराज्ये प्रथमचरणे ९१.७८ प्रतिशतं मतदानम् अभवत्। देशस्य स्वतन्त्रतापश्चात् इदानीं यावत् अयं सर्वाधिकः मतदान-प्रतिशतः अस्ति। आयोगेन सूचितं यत् तमिळनाडुराज्ये अपि अद्य ८४.६९ प्रतिशतं विक्रमीयं मतदानम् अङ्कितम्। तत्र ८३.५७ प्रतिशतात् अधिकाः पुरुषाः, ८५.७६ प्रतिशतं महिलाः तथा ६०.४९ प्रतिशतं तृतीयलिङ्गिनः मतदातारः मतदानं कृतवन्तः। पश्चिमबङ्गालराज्ये ९०.९२ प्रतिशतं पुरुषमतदातारः, ९२.६९ प्रतिशतं महिलामतदात्र्यः तथा ५६.७९ प्रतिशतं तृतीयलिङ्गिनः स्वमताधिकारस्य प्रयोगं कृतवन्तः। अतिरिच्य, गुजरातराज्यस्य उमरेठ-उपनिर्वाचने ५९.०३ प्रतिशतं मतदातारः भागं गृहीतवन्तः। महाराष्ट्रस्य बारामती-क्षेत्रे ५७.४८ प्रतिशतं तथा राहुरी-उपनिर्वाचने ५५.३१ प्रतिशतं मतदानम् अङ्कितम्। मुख्य-निर्वाचन-आयुक्तः ज्ञानेशकुमारः, निर्वाचन-आयुक्तौ डॉ. एस.एस. संधू तथा डॉ. विवेक जोशी च 'लाइव-वेबकास्टिंग्' माध्यमेन मतदानप्रक्रियायाः सूक्ष्मनिरीक्षणं कृतवन्तः। उभयोः राज्ययोः सर्वेषु मतदानकेन्द्रेषु एषा व्यवस्था कृता आसीत्।

## एम्स-ऋषिकेशस्य षष्ठः दीक्षान्तसमारोहः: उपराष्ट्रपतिना ३८६ छात्रेभ्यः उपाधयः प्रदत्ताः




उपराष्ट्रपतिः सी. पी. राधाकृष्णन् महोदयः अखिलभारतीय-आयु-विज्ञानसंस्थानस्य (एम्स) ऋषिकेशस्य षष्ठे दीक्षान्तसमारोहे भागं गृहीतवान्। अस्मिन् अवसरे एम्स-संस्थानस्य कार्यकारी-निदेशिका प्रोफेसर डॉ. मीनू सिंह महोदया उक्तवती यत् अयं दीक्षान्तसमारोहः छात्राणां शैक्षणिक-उपलब्धीनाम् उत्सवः अस्ति एव, परं राष्ट्राय समर्पितानां, सक्षमाणां, नैतिक-स्वास्थ्यसेवकानां च निर्माणाय एम्स-ऋषिकेशस्य प्रतिबद्धतायाः प्रतीकः अपि वर्तते। कार्यकारी-निदेशिका सूचितवती यत् अस्मिन् दीक्षान्तसमारोहे विविध-पाठ्यक्रमाणां कुल ३८६ छात्रेभ्यः उपाधयः (Degrees) वितरिताः। अस्मिन् अवसरे उत्तमतया उत्तीर्णवद्भ्यः छात्रेभ्यः कुल २३ पदकानि प्रदत्तानि, येषु १३ स्वर्णपदकानि, ५ रजतपदकानि तथा ५ कांस्यपदकानि सम्मिलितानि सन्ति। अस्मिन् कार्यक्रमे उत्तराखण्डस्य राज्यपालः गुरमीत सिंह महोदयः, मुख्यमन्त्री पुष्कर सिंह धामी तथा केन्द्रीय-स्वास्थ्य-एवं-परिवारकल्याण-राज्यमन्त्रिणी अनुप्रिया पटेल अपि उपस्थिताः आसन्।

## लौकिकन्यायकोशः "कण्टकन्यायः"

कण्टक इत्यस्य शब्दस्य अधमपक्षेण 'तीक्ष्णाग्रकाष्ठखण्डः शत्रुः' इति अर्थद्वयं विद्यते। पादे कण्टकः लग्नः चेत् अपरेण कण्टकेन वयं पूर्वं कण्टकं निष्कासयामः। तदनन्तरं कण्टकद्वकारणात् अपि दुःखं मा भूत् इति वयं तद्द्वयपि दूरीकुर्मः। तथैव आवश्यकताम् अनुसृत्य एकस्य शत्रोः साहाय्येन अपरस्य शत्रोः नाशः क्रियते तदनन्तरं पूर्वस्यापि शत्रोः नाशः क्रियते। अयं न्यायः राजनीतिविधानं प्रकाशयति।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मया एका अपूर्वा वार्ता पठिता।
**काव्या-** एकेन क्षिप्र-वितरण-कर्त्रा बहुमूल्येन थर-यानेन वस्तूनि वितरितानि। जनाः एतत् दृष्ट्वा विस्मिताः अभवन्।
**नन्दिनी-** आम्, व्ययबहुलम् एतत् कार्यं श्रुतं मया। धनेन सह विवेकः अपि आवश्यकः।
**नन्दिनी-** किन्तु मरुदेशे अन्यदेव जातम्। तत्र विवाहे पञ्च-शतं जल-पात्राणि यौतुकरूपेण दत्तानि। पक्षिणां रक्षणाय एतत् कृतम्।
**काव्या-** सत्यम्, तस्य परिवारस्य पर्यावरण-प्रीतिः सर्वैः प्रशंसिता अस्ति। पशवः अपि अस्माकं बान्धवाः।
**काव्या-** इदानीं पश्य, एकेन ग्राहकेण वित्तकोशात् लक्ष-त्रयं रूप्यकाणि लब्धानि। ऋण-पत्रकस्य कारणात् तेन क्लेशः सोढः।
**नन्दिनी-** वित्तकोशस्य प्रमादः न्यायालयेन दण्डितः, एतत् योग्यम्। अन्ते एका अन्या वार्ता।
**नन्दिनी-** काश्यां एकेन प्रदर्शकेन निपुणतया निप्पोन-भाषा भाषिता। सः विद्यालये न पठितवान् अस्ति, परन्तु पर्यटकेभ्यः सर्वम् अधीतवान् अस्ति।
**काव्या-** अहो! तस्य प्रयत्नः सफलीभूतः। काशी सदा ज्ञानस्य केन्द्रम्।